# Mahamrityunjayastotram

# મહામૃત્યુઞ્જયસ્તોત્રમ્

## Document Information

Text title : Mahamrityunjayastotram 1

File name : mahaamrtyu.itx

Category : shiva, stotra

Location : doc_shiva

Author : Traditional

Transliterated by : P. P. Narayanaswami

Proofread by : P. P. Narayanaswami

Description-comments : Not readily found in the mArkaNDeyapurANa in print.

Latest update : March 15, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 5, 2024

*sanskritdocuments.org*

# મહામૃત્યુઞ્જયસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીમહામૃત્યુઞ્જયસ્તોત્રમન્ત્રસ્ય શ્રી માર્કણ્ડેય ઋષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીમૃત્યુઞ્જયો દેવતા, ગૌરી શક્તિઃ,
મમ સર્વારિષ્ટસમસ્તમૃત્યુશાન્ત્યર્થં સકલૈશ્વર્યપ્રાપ્ત્યર્થં
જપે વિનોયોગઃ ।
અથ ધ્યાનમ્ ।
ચન્દ્રાર્કાગ્નિવિલોચનં સ્મિતમુખં પદ્મદ્વયાન્તસ્થિતં
મુદ્રાપાશમૃગાક્ષસત્રવિલસત્પાણિં હિમાંશુપ્રભમ્ ।
કોટીન્દુપ્રગલત્સુધાપ્લુતતમું હારાદિભૂષોજ્જ્વલં
કાન્તં વિશ્વવિમોહનં પશુપતિં મૃત્યુઞ્જયં ભાવયેત્ ॥

અથ સ્તોત્રમ્ ।
ૐ રુદ્રં પશુપતિં સ્થાણું નીલકણ્ઠમુમાપતિમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧॥

નીલકણ્ઠં કાલમૂર્ત્તિં કાલજ્ઞં કાલનાશનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૨॥

નીલકણ્ઠં વિરૂપાક્ષં નિર્મલં નિલયપ્રદમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૩॥

વામદેવં મહાદેવં લોકનાથં જગદ્ગુરુમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૪॥

દેવદેવં જગન્નાથં દેવેશં વૃષભધ્વજમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૫॥

ત્ર્યક્ષં ચતુર્ભુજં શાન્તં જટામકુટધારિણમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૬॥

ભસ્મોદ્ધૂલિતસર્વાઙ્ગં નાગાભરણભૂષિતમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૭॥

અનન્તમવ્યયં શાન્તં અક્ષમાલાધરં હરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૮॥

આનન્દં પરમં નિત્યં કૈવલ્યપદદાયિનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૯॥

અર્દ્ધનારીશ્વરં દેવં પાર્વતીપ્રાણનાયકમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૦॥

પ્રલયસ્થિતિકર્ત્તારમાદિકર્ત્તારમીશ્વરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૧॥

વ્યોમકેશં વિરૂપાક્ષં ચન્દ્રાર્દ્ધકૃતશેખરમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૨॥

ગઙ્ગાધરં શશિધરં શઙ્કરં શૂલપાણિનમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૩॥

(Variation addition
ગઙ્ગાધરં મહાદેવં સર્વાભરણભૂષિતમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૬॥)
અનાથઃ પરમાનન્તં કૈવલ્યપદગામિનિ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૪॥

સ્વર્ગાપવર્ગદાતારં સૃષ્ટિસ્થિત્યન્તકારણમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૫॥

કલ્પાયુર્દ્દેહિ મે પુણ્યં યાવદાયુરરોગતામ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૬॥

શિવેશાનાં મહાદેવં વામદેવં સદાશિવમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૭॥

ઉત્પત્તિસ્થિતિસંહારકર્તારમીશ્વરં ગુરુમ્ ।
નમામિ શિરસા દેવં કિં નો મૃત્યુઃ કરિષ્યતિ ॥ ૧૮॥

ફલશ્રુતિઃ -

માર્કણ્ડેયકૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
તસ્ય મૃત્યુભયં નાસ્તિ નાગ્નિચૌરભયં ક્વચિત્ ॥ ૧૯॥

શતાવર્ત્તં પ્રકર્તવ્યં સંકટે કષ્ટનાશનમ્ ।
શુચિર્ભૂત્વા પથેત્સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૦॥

મૃત્યુઞ્જય મહાદેવ ત્રાહિ માં શરણાગતમ્ ।
જન્મમૃત્યુજરારોગૈઃ પીડિતં કર્મબન્ધનૈઃ ॥ ૨૧॥

તાવકસ્ત્વદ્ગતઃ પ્રાણસ્ત્વચ્ચિત્તોઽહં સદા મૃડ ।
ઇતિ વિજ્ઞાપ્ય દેવેશં ત્ર્યમ્બકાખ્યમનું જપેત્ ॥ ૨૨॥

નમઃ શિવાય સામ્બાય હરયે પરમાત્મને ।
પ્રણતક્લેશનાશાય યોગિનાં પતયે નમઃ ॥ ૨૩॥

(૨૪ with variation added)

શતાઙ્ગાયુર્મન્ત્રઃ ।
ૐ હ્રીં શ્રીં હ્રીં હ્રૈં હ્રઃ
હન હન દહ દહ પચ પચ ગૃહાણ ગૃહાણ
મારય મારય મર્દય મર્દય મહામહાભૈરવ ભૈરવરૂપેણ
ધુનય ધુનય કમ્પય કમ્પય વિઘ્નય વિઘ્નય વિશ્વેશ્વર
ક્ષોભય ક્ષોભય કટુકટુ મોહય મોહય હું ફટ્
સ્વાહા ઇતિ મન્ત્રમાત્રેણ સમાભીષ્ટો ભવતિ ॥

॥ ઇતિ શ્રીમાર્કણ્ડેયપુરાણે માર્કણ્ડેયકૃત મહામૃત્યુઞ્જયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Although the colophone refers the stotra is from the Markandeya Purana, it is not readily found in the Purana in print.

Encoded by P. P. Narayanaswami

pdf was typeset on September 5, 2024

Please send corrections to *sanskrit@cheerful.com*